# 8. काषायाणां कोऽपराधः

[મહાત્મા ગાંધીની સાથે કાકાસાહેબ કાલેલકરે ઘણા સમય સુધી કામ કર્યું હતું. અનેક વર્ષો સુધી તેમને મહાત્મા ગાંધીની સાથે રહેવાનો, ફરવાનો તથા વિચારવિમર્શ કરવાનો અવસર મળ્યો હતો.

આવા વિવિધ અવસરોમાં ઘટેલી કેટલીક મહત્ત્વની ઘટનાઓને કાકા કાલેલકરે પોતાની સાહિત્યિક પ્રતિભાથી સુરેખ રીતે આકાર આપ્યો છે. એમાંની અનેક ઘટનાઓ આજેય આપણને પ્રેરણા પૂરી પાડી રહી છે. કાકા સાહેબ દ્વારા ગુજરાતી ભાષામાં લખાયેલી આવી જ એક રોચક ઘટનાનો સરળ સંસ્કૃતમાં અનુવાદ તેમજ તેનું જરૂરી સંપાદનકાર્ય કરીને પ્રસ્તુત પાઠ તૈયાર કરવામાં આવ્યો છે.

સેવાકાર્યમાં માણસે પોતાની પ્રતિષ્ઠા બાધક ન બને તે સતત ધ્યાનમાં રાખવું જોઈએ એ આ ઘટનાનો મુખ્ય ઉપદેશ છે. વળી, મનમાં રહેલા ધર્મની સાથે વસ્ત્રોનો કાયમી સંબંધ નથી એ પણ બધાએ સમજવા જેવી વાત છે.]

---

महात्मा गान्धिमहोदयः स्वातन्त्र्यान्दोलनं प्रारभत । अस्यान्दोलनस्य निखिलोऽपि व्यवहारः प्रारम्भेषु दिवसेषु साबरमती-आश्रमे एव प्राचलत् । एकस्मिन् दिवसे स्वामी सत्यदेवः आश्रमम् आगच्छत् । सः देशस्य स्वतन्त्रतार्थं कार्यरतस्य गान्धिमहोदयस्य कार्येण अतीव प्रभावितः प्रसन्नः चासीत् । सः गान्धिमहोदयायाकथयदहं भवतः आश्रमे प्रवेशं निवासं च इच्छामि । देशस्य स्वतन्त्रतायै कार्यं कर्तुं ममापि महतीच्छा वर्तते ।



सत्यदेवस्य प्रस्तावं गान्धिमहोदयः स्वीकृत-वान् । गान्धिमहोदयः अकथयत् - ''साधु, स्वागतमत्र भवतः । आश्रमोऽयं भवत एव, किन्तु आश्रमप्रवेशात् पूर्वं भवता काषायवस्त्राणां त्यागः करणीयः ।'' गान्धिमहोदयस्य आदेशं श्रुत्वा आश्चर्यान्वितः स्वामिसत्यदेवः मनसि अकुप्यत् । किन्तु सः गान्धिमहोदयस्य पुरतः निजरोषं नाप्रकटयत् । सोऽकथयत्, ''कथं काषायवस्त्राणां त्यागः ? काषायवस्त्राणां कोऽपराधः ? अहं संन्यासिजनः । संन्यासिनः काषायवस्त्राणि परिधारयन्ति । अहं काषायवस्त्राणां त्यागं कर्तुं कथं प्रवृत्तो भवामि ।''

स्वामिसत्यदेवस्य वचनं श्रुत्वा शान्तस्वरेण गान्धिमहोदयः अकथयत्, ''भवता यदुक्तं तत्सत्यमस्ति । किन्तु भवान् संन्यासस्य त्यागं करोतु इति न ममाशयः । केवलं काषायवस्त्राणां त्यागं कर्तुं वदामि ।''

गान्धिमहोयदस्य कथनतात्पर्यमजानानः सत्यदेवः विचारमुद्रायां स्थितः, मौनं चावलम्बितवान् ।

तस्य तादृशीं मनोदशाम् अवगम्य गान्धिमहोदयः स्वकीयमाशयं स्पष्टं कर्तुं शान्तभावेन मृदुभाषया च सत्यदेवायाकथयत् । – "शृणोतु भवान् सावधानेन मनसा । वयं अन्येषां सेवां कर्तुं प्रवृत्ताः स्मः । एतदेवास्माकं ध्येयमस्ति । भवान् जानात्येव यदस्माकं देशे जनाः काषायवस्त्रधारिणः संन्यासिनः सेवां कर्तुं सदैव समुत्सुकाः भवन्ति । यदा भवान् सेवाकार्याय प्रवृत्तः भविष्यति तदा काषायवस्त्रधारिणं भवन्तं दृष्ट्वा एकतः ते भवतः सेवाकार्यं न अङ्गीकरिष्यन्ति, अपरतः ते भवतः सेवां कर्तुं प्रवृत्ताः भविष्यन्ति । अनेन किमस्माकं ध्येयस्य हानिः न भविष्यति ? संन्यासस्तु मनोगतः सङ्कल्पः एव । तस्य परिधानेन सह सम्बन्धः कयापि दृष्ट्या न योग्यः । अहं निश्चितं मन्ये यत् काषायवस्त्राणां त्यागेन संन्यासत्यागः नैव भविष्यति । अतः विचारयतु भवान्, तदनन्तदरं यद्योग्यम् तत्करोतु ।"

गान्धिमहोदयस्य एतादृशं वचनं श्रुत्वा स्वामिसत्यदेवस्य संशयः तस्मिन्नेव क्षणे व्यपगतः । सः काषायवस्त्राणां त्यागं कृत्वा सेवाकार्ये आत्मानं योजयितुं सन्नद्धोऽभवत् ।

## ટિપ્પણી

**નામ (પુંલ્લિંગ) : निजरोषः** પોતાનો ગુસ્સો **अपराधः** ગુનો, દોષ **सङ्कल्पः** નિશ્ચય, મનસૂબો, ઇરાદો

**(સ્ત્રીલિંગ) : विचारमुद्रा** વિચારની મુદ્રા **मनोदशा** મનની દશા **हानिः** નુકસાન

**(નપુંસકલિંગ) : आन्दोलनम्** હલચલ ઊભી કરવી તે **काषायवस्त्रम्** ભગવું કપડું. સંન્યાસીઓને પહેરવાના વસ્ત્રનો રંગ ભગવો હોય છે. **मौनम्** મૌન, ચૂપ રહેવું તે **ध्येयम्** ધ્યાન કરવા યોગ્ય, લક્ષ્ય

**સર્વનામ : एकस्मिन्** એકમાં **भवतः** આપનું (પું.) **अन्येषाम्** બીજાઓનું, અન્યોનું **अस्माकम्** આપણું **भवन्तम्** તમને, આપને

**વિશેષણ : निखिल** સંપૂર્ણ, પૂરેપૂરું **कार्यरत** કાર્યમાં લાગેલું **प्रसन्न** ખુશ, આનંદિત **महती** મોટી **स्वकीय** પોતાનું **मनोगत** મનમાં રહેલું **सन्नद्ध** તૈયાર, સજ્જ

**અવ્યય : अतीव** ખૂબ જ, પુષ્કળ **साधु** ભલે, સ્વીકૃતિવાચક ઉદ્‌ગાર **एकतः** એક બાજુ **अपरतः** બીજી બાજુ

**સમાસ :** स्वातन्त्र्यान्दोलनम् (स्वातन्त्र्यस्य आन्दोलनम् । षष्ठी तत्पुरुष) । कार्यरतस्य (कार्येषु रतः – कार्यरतः, तस्य । सप्तमी तत्पुरुष) । आश्रमप्रवेशात् (आश्रमस्य प्रवेशः – आश्रमप्रवेशः, तस्मात् । (षष्ठी तत्पुरुष) । निजरोषम् (निजस्य रोषः निजरोषः, तम् । षष्ठी तत्पुरुष) । कथनतात्पर्यम् कथनस्य तात्पर्यम् । षष्ठी तत्पुरुष) । विचारमुद्रायाम् (विचारस्य मुद्रा विचारमुद्रा, तस्याम् । षष्ठी तत्पुरुष) । मनोदशाम् (मनसः दशा, मनोदशा, ताम् । षष्ठी तत्पुरुष) । सेवाकार्याय (सेवायाः कार्यम् सेवाकार्यम्, तस्मै । षष्ठी तत्पुरुष) । मनोगतः (मनः गतः, द्वितीया तत्पुरुष) । संन्यासत्यागः (संन्यासस्य त्यागः । षष्ठी तत्पुरुष) ।

**કૃદન્ત :** कर्तुम् (कृ + तुम्) । श्रुत्वा (श्रु + त्वा) । अवगम्य (अव + गम् + त्वा > य) । दृष्ट्वा (दृश् + त्वा) योजयितुम् (युज्-(प्रेरक) + तुम्) ।

**ક્રિયાપદ : પ્રથમ ગણ :** (પરસ્મૈપદ) **प्र + चल् (प्रचलति)** ચાલવું **आ + गम् > गच्छ् (आगच्छति)** આવવું, **इष्-इच्छ् (इच्छति)** ઇચ્છવું

(આત્મનેપદ) प्र + आ + रभ् (**प्रारभते**) પ્રારંભ કરવો, શરૂ કરવું

ચતુર્થ ગણ : (પરસ્મૈપદ) कुप् (**कुप्यति**) ક્રોધે ભરાવું, ગુસ્સે થવું

દશમ ગણ : (પરસ્મૈપદ) वि + चर् (**विचारयति**) વિચારવું

## વિશેષ

(1) શબ્દાર્થ : प्रभावितः પ્રભાવિત થયેલો प्रसन्नः ખુશ प्रस्तावम् પ્રસ્તાવનો, દરખાસ્તનો स्वीकृतवान् સ્વીકાર કર્યો. करणीयः કરવો જોઈએ. आश्चर्यान्वितः આશ્ચર્ય પામેલો मनसि મનમાં न अप्रकटयत् પ્રગટ કર્યો નહીં. संन्यासिजनाः સંન્યાસી લોકો परिधारयन्ति પહેરે છે. ધારણ કરે છે. सन् હોઈને मम आशयः મારો આશય, મારો ઇરાદો अजानानः નહિ જાણતો, અજાણ मौनम् अवलम्बितवान् મૌનનો આધાર લીધો. મૌન ધારણ કર્યું. प्रवृत्ताः स्मः પ્રવૃત્ત થયા છીએ. समुत्सुकाः ઉત્સુક, તૈયાર न अङ्गीकरिष्यन्ति સ્વીકારશે નહીં. परिधानेन सह પહેરવેશ સાથે, વેશભૂષાની સાથે कयापि दृष्ट्या કોઈ પણ દૃષ્ટિએ, કોઈ પણ રીતે विचारयतु भवान् આપ વિચારો. तदनन्तरम् તે પછી तत्करोतु તે કરો. व्यपगतः દૂર થઈ ગયો. જતો રહ્યો.

(2) સંધિ : अस्यान्दोलनस्य (अस्य आन्दोलनस्य) । निखिलोऽपि (निखिलः अपि) । गान्धिमहोदयायाकथयदहम् (गान्धिमहोदयाय अकथयत् अहम्) । ममापि (मम अपि) । महतीच्छा (महती इच्छा) । नाप्रकटयत् (न अप्रकटयत्) । प्रवृत्तो भवामि (प्रवृत्तः भवामि) । एतदेवास्माकम् (एतत् एव अस्माकम्) । जानात्येव (जानाति एव) । संन्यासस्तु (संन्यासः तु) । यद्योग्यम् (यत् योग्यम्) ।

## સ્વાધ્યાય

1. निम्नप्रश्नानाम् उत्तराणि समुचितं विकल्पं चित्वा लिखत ।

(1) स्वातन्त्र्यान्दोलनस्य व्यवहारः आरम्भदिनेषु कुत्र प्राचलत् ? ◯

(क) साबरमती-आश्रमे (ख) वर्धा-आश्रमे (ग) दांडीसमीपे (घ) पालडी-ग्रामे

(2) गान्धिमहोदयस्य कार्येण कः प्रभावितः प्रसन्नः च आसीत् ? ◯

(क) सत्यदेवः (ख) महादेवः (ग) निपुणस्वामी (घ) जवाहरलालः

(3) गान्धिमहोदयस्य पुरतः किं कर्तुं सत्यदेवः समर्थः न अभवत् ? ◯

(क) सेवाकार्यम् (ख) रोषं प्रकटयितुम् (ग) रोषं गोपयितुम् (घ) आश्रमं गन्तुम्

(4) सत्यदेवस्य वचनं श्रुत्वा गान्धिमहोदयः कथम् अवदत् ? ◯

(क) शान्तस्वरेण (ख) क्रुद्धस्वरेण (ग) श्रान्तस्वरेण (घ) दृढसंकल्पेन

(5) संन्यासः कीदृशः सङ्कल्पः वर्तते । ◯

(क) मननीयः (ख) मोहगतः (ग) मनोगतः (घ) काषायपरिधानस्य

2. **अधोलिखितानां प्रश्नानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) सत्यदेवः कः आसीत् ?

(2) गान्धिमहोदयस्य ध्येयं किम् आसीत् ?

(3) जनाः कस्य सेवां न अङ्गीकुर्वन्ति ?

(4) कस्य त्यागेन संन्यासस्य त्यागः न भवति ?

(5) स्वामिसत्यदेवः किमर्थं सन्नद्धः अभवत् ?

3. **अधोलिखितानि क्रियापदानि वर्तमानकालस्य (लट्लकारस्य) रूपत्वेन परिवर्तयत ।**

(1) प्रारभत (2) आगच्छत् (3) अकथयत्

(4) भविष्यन्ति (5) अकुप्यत्

4. **रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितपदं चित्वा प्रश्नवाक्यं रचयत ।**

(के, केषाम्, कीदृशेन, कस्य, कः, कथम्)

(1) सत्यदेवस्य प्रस्तावं <u>गान्धिमहोदयः</u> स्वीकृतवान् ।

(3) <u>संन्यासिजनाः</u> काषायवस्त्राणि परिधारयन्ति ।

(4) केवलं <u>काषायवस्त्राणां</u> त्यागं कर्तुं वदामि ।

(5) शृणोतु भवान् <u>सावधानेन</u> मनसा ।

(6) ते <u>भवतः</u> सेवाकार्यं न अङ्गीकरिष्यन्ति ।

5. **शब्दरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | ................ | ................ | दिवसेषु |
| (2) | कार्यरतस्य | ................ | ................ |
| (3) | ................ | ................ | स्वैरैः |
| (4) | ................ | त्यागाभ्याम् | ................ |
| (5) | देशे | ................ | ................ |

6. **उदाहरणानुसारं धातुरूपाणां परिचयं कारयत ।**

**उदाहरणम् :**

| | धातुरूपम् | कालः | पदम् | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| | मन्ये | वर्तमानकालः | आत्मनेपदम् | उत्तमपुरुषः | एकवचनम् |
| (1) | भविष्यन्ति | ................ | ................ | ................ | ................ |

| | | | | | |
|---|---|---|---|---|---|
| (2) | प्राचलत् | ................ | ................ | ................ | ................ |
| (3) | अकथयत् | ................ | ................ | ................ | ................ |
| (4) | भवामि | ................ | ................ | ................ | ................ |

**7. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) એક દિવસ આશ્રમમાં આવ્યા.

एक दिवस आश्रम आ + गम् ।

(2) કાર્યથી ખૂબ જ પ્રભાવિત હતા.

कार्य अतीव प्रभावित अस् ।

(3) ત્યાગ કરવા માટે કેવી રીતે પ્રવૃત્ત થાઉં ?

त्याग कृ+तुम् कथम् प्रवृत्त भू ।

(4) માત્ર કાષાયવસ્ત્રોનો ત્યાગ કરવા માટે કહું છું.

केवल काषायवस्त्र त्याग वद् ।

**8. कृदन्त-प्रकारं लिखत ।**

(1) विकीर्य ................ ।

(2) भवितुम् ................ ।

(3) आदाय ................ ।

(4) छेत्तुम् ................ ।

(5) धृत्वा ................ ।

**9. मातृभाषया उत्तराणि लिखत ।**

(1) સાબરમતી આશ્રમમાં શું ચાલતું હતું ?

(2) સ્વામી સત્યદેવ આશ્રમમાં પ્રવેશ શા માટે ઈચ્છતા હતા ?

(3) ગાંધીજીએ શાંત સ્વરે શું કહ્યું ?

(4) સંન્યાસીઓ સાથે આપણા દેશના લોકો કેવો વ્યવહાર રાખે છે ?

(5) ગાંધીજીની વાત સાંભળીને છેવટે સ્વામી સત્યદેવે શું કર્યું ?

**પ્રવૃત્તિઓ**

- સાબરમતી આશ્રમની મુલાકાત લો.
- આઝાદીની ચળવળના સત્યાગ્રહો વિશે જાણકારી મેળવો.
- ગાંધીજીની આત્મકથા सत्यशोधनम् (સત્યના પ્રયોગો) મેળવીને વાંચો.

•